पेज = 1
= 15 X 11 X 0.1 cm.

ओं स्वास्ति श्री गणेशायनमः वेषाम प्रीतदीरीत

... ...

दातेरास्तोरमीयाज वलगा स्हेगाडुलत

पेज = 4 । विषय = पुराण
= 28 X 12 X 0.1 c.m.

भीतम उवाच । इममर्थपरावृवट :इदमहै

... ...

वाक्यैर्विशेषैनप्रजनीयाकिजोत्तामा :उन्नहि-
- दत्वातिथये सम्यक्

देशान्तरनृपात्कालः प्रोच्यते बुधैः॥ अन्नदः सुखमाप्नोति लोके धनवान्रूपवान्भवेत्॥ आ
युष्मान्बलवांश्चैव सुखी चैव प्रजायते॥ नित्यं ददाति यश्चान्नं सुमतिः प्रियः समा
हितः॥ स जाति ब्रह्मसायुज्यमेवमाह पराशरः॥ अन्नेन सदृशं दानं न भूतो न भ
विष्यति॥ तस्मादन्नं विशेषेण दातुमिच्छन्ति साधवः॥ कृत्वा हि सुमहत्पापं यश्चा
दन्नदो भवेत्॥ विमुक्तः सर्वपापेभ्यो विष्णुलोकं स गच्छति॥ आशासन्ते हि पि
तरः सुवृष्टिमिव कर्षकाः॥ अस्माकमपि पुत्रो वा पौत्रो वान्नं प्रदास्यति यो
दद्यात्परिक्लिष्टमन्नमध्वनि वर्त्तिने श्रान्तायादृष्टपूर्वाय परां गतिमवाप्नुया
त्॥ न पृच्छेद्गोत्रचरणं न स्वाध्यायं श्रुतं तथा॥ याचितो ब्राह्मणेनान्नं दद्यादेवा
विचारयन्॥ दुर्वृत्तः साधुवृत्तो वा मूर्खः पण्डित एव वा यः प्राप्तो वैश्वदेवान्ते सोऽति
थिः स्वर्गसंक्रमः॥ अदृष्टदृष्टपूर्वं वा मित्रं वा सुहृदं तथा॥ ब्राह्मणं वा भोजयेन्नि
त्यं शान्तशीलसमन्वितं॥ नायं त्रितयश्च तुर्वेदी सर्वशास्त्रार्थवाची॥ गायत्रीमा
त्रसारो वरो विप्रः सुयन्त्रितः॥ ईश्वरः सर्वभूतानां हृदये संभवस्थितः॥ तस्माद
तिथये कार्यो भवः सोऽपि जिह्वागतः॥ पादाभ्यंगैः शिरोभ्यंगैः स्नानभोजनासनादि
भिः॥ शिष्टवाक्यविशेषैः न पूजनीया द्विजोत्तमाः॥ अन्नं हि दत्वातिथये सम्यक्

दे॰ श्रद्धासमन्वितं दानं सर्वं सर्वत्र तिष्ठति वैष्णवाय प्रयुज्यते ॥ प्रीयतां विष्णुरित्युक्त्वा वैष्ण
वं शांतमानसं ॥ भोजयेत्मिष्टमेवान्नं यथाशक्तिसमन्वितः ॥ आराध्य वैष्णवं भक्त्या
तं सदा तद्भावनिष्ठितं ॥ प्रीयतां भगवान् विष्णुरिति संकल्प्य भोजयेत् ॥ मिष्टान्न
मपरिक्लिष्टं शाकादिं दद्यात्तु तं ॥ दरिद्रं तारयेत्पापात्कृतात्तस्य दक्षिणां ॥ ब्राह्म
णोन्नः प्रतिश्रुत्य न ददाति यो नरः मूढधीः स याति नरकं घोरं तिर्यग्योनिषु जाय
ते ॥ प्रियातिथिर्गृहस्थो यः संतुष्टो विजितेंद्रियः ॥ तपःस्वाध्यायनिरतः स्वर्गस्तस्य
न दूरतः ॥ श्रीकृष्ण उवाच ॥ नारदेनैव कृष्णस्तु प्रसादयान्नं महं सदा ॥ अन्नं प्रासादत्व
मापन्नं तस्माद्देहि युधिष्ठिर ॥ अन्नदत्तं मनुष्येषु प्रासादात भवितुं तः ॥ प्रासाद
नान्यरं दानमन्यद [illegible] न्नं न विद्यते ॥ अन्नं तु तेन कथ्यते लोभस्याभावितं हृचः ॥ प्रासा
नुदत्वा कथितं पश्चाद्वृत्ति विनाकुरा ॥ तादृशी पुरुषव्याघ्र स प्रेत्य लभते गतिं ॥ श्रद्धया
शांततां यो न्नं मतिषिज्यप्रयच्छति ॥ स याति परमं स्थानं [illegible] प्राप्य वत्सरे रवि ॥ दद्या
त्प्रयोन्नं स घृतं सुसंस्कृतं दधूच पूर्णं पयसा संयोजितं ॥ द्विजेंद्र पुरुषव्याघ्र पयस्तु पूर्णव
त्सरं न तस्य लोकाः परिहानि भवति ॥ श्रीकृष्ण उवाच ॥ अत्राप्युदाहरंतीममितिहासं दे॰
पुरातनं वटो वृक्षो श्वसंवादं तं नैमिषारण्ये समागतैः ॥ ब्रह्मप्रजा संन्यस्य चिरं तिष्टन्नु यो

८२ सगत्वा श्राप्य तु तत्सर्वं नदीवेगे समाकुलं ॥ न दृष्टं तत्र सा विप्र पितरं पुनः
मा षतां कुशियासा स जा विष्टो मुनिरेशाल किस्ततः पदमं पुरेपतितं रुत्र
मशापत क्रोधमूर्छितः ॥ ततः स पित्रा निहतो वा सव ज्रेता कृताञ्जलिः ॥ प्र
सीदेति ब्रुवन्नेव गतस्त्वाव नद्रूवि ॥ तं दृष्ट्वा पतितं पुत्रं स मुनिः शोकदुःखि
तः ॥ किं मया कृतमित्युक्त्वा परिद्धू ज्य रुरोदतं ॥ तच्छ्रुत्वा मुनयः सर्वे तपोव
ननिवासिनः ॥ आगत्य तुल्यदुःखास्ते परिवार्य यतस्थिरे ॥ पैत्र रात्रा घष्ठपा
तेन नासिके तः सहस्थितः ॥ नासिकेत उवाच ॥ दृष्टा हं जात तत्र गतं स देवोय
मपद्येत्या हपितामवत ॥ न चैतत्तक्ष्य मनन्त विप्रक तुं दृष्ट्वा प्राह पृतिरा
ष्ठ स्वसोप्य ॥ सोऽच तत्त्वसो तव देहस्याकर्त्ता करोमि किं चापि मनः प्रियंते ॥
पिपातिपेवरसिंहब्व शाश्वतु तस्माह धर्मराजं ययाचे ॥ यदि प्रसन्नो
भगवान्मामाघस्मानानिमिद्रिपिद आयदहान ॥ ततः समारोप्य समा
विमानमत्युद्भुतान दर्शयामास लोकान् ॥ अपश्यमहं तत्र विमाना
नि सहस्रशः ॥ वैदूर्यकाप्रकाशानि जांबूनदसमानि च रत्नदिव्यविचित्रा
रिणानि तान्यप्सरोगणैः ॥ सर्वकामसमृद्धानि कामगानि स्थिरा तथा ॥ ८२

हीनां शीर्णवस्त्रादृष्टतपस्विनां ॥ दुरस्थारन्यालक्षाच नदेयाङ्गोः कदाचन ॥ सी
तवहून्नत्याय श्कोनि यायाहितान्नये ॥ अतिथिपिपिपदांतावधेन द्विजा
तुराचिता ॥ अकुलीनाय संस्र्वावदांताय कूपरामपचा ॥ हव्यकव्यव
चेतायनदेयाङ्गोकदाचा ॥ प्रसादा यत्नसौवर्तोः शपथारत्नोज्वलास्तथा
वराश्चाप्सरसो [illegible] त्रतत्र गच्छंति गोप्रदाः ॥ [illegible] गोप्रदानान्नरो याति ब्र
ह्मलोकं सनातनं ॥ विमाने नाकिवरो नंदिव्यरत्नेविराजते ॥ रूपवे
ताः सहस्रैराप्सरसः शतशोवरस्त्रोभिताः ॥ रमवंति विमानस्था दिव्याभरणभू
षिताः ॥ वेणूनां वल्लकीनां च नूपुराणां च सिंजतेः ॥ हासैश्च हरिणाक्षी
णां सुप्तः संप्रतिबुध्यते ॥ अत्रैवोदाहरंतीमजितिहासं पुरातनं ॥ ऋषे
रोद्दालकेर्वाक्यं नासिकेतस्य चोभयोः ॥ ऋषिरोद्दालकिर्दीक्षामधिग
म्य ततः सुतं ॥ त्वं मामुपचरस्वेति नासिकेतमभाषत ॥ समाप्ते नियमे त
स्मिन्महर्षिः प्राह तं सुतं ॥ उपस्पर्शनसक्तस्य स्वाध्यायनिरतस्य च ॥ इध्मा
दर्भाः सुमनसः कलशं जलान्तिके ॥ विस्मृतं मे तदादाय नदीतीरस्थितो व्रज ॥

नीका उवाच ॥ इममर्थं पुरा पृष्टः कृष्णद्वैपायनं मम वदसौ कथयामास तन्मे नि
गदतः शृणु ॥ ब्राह्मणं स्वयमाहूय याचमानमकिंचनं पश्चान्नास्तीति यो ब्रूया
त्तं विद्याद्ब्रह्मघातकं ॥ धर्मनिरतो मूढो भिक्षां यो वै द्विजातिषु वदन्नास्तीति किं
यस्तं तं विद्याद्ब्रह्मघातकं ॥ आत्मजां गुरां सेवन्नामहतीं प्रश्येवरे नयच्छति यः क
न्यां तं विद्याद्ब्रह्मघातकं ॥ न्यायेनोपार्जितं द्रव्यं ब्राह्मणस्य हरेत्तु यः स्वाध्यायवृत्ति
युक्तस्य तं विद्याद्ब्रह्मघातकं ॥ नास्तिको भिन्नमर्यादो ह्यदेवब्राह्मणाद्दूषकः धर्म
निंदापरश्चैव तं विद्याद्ब्रह्मघातकं ॥ गोकुलस्य तृषार्त्तस्य जलार्थं समभिधावतः
उत्पादयति यो विघ्नं तं विद्याद्ब्रह्मघातकं ॥ पंगांधस्य च दीनस्य व्याधितस्य ज
डस्य च हरते यो वै सर्वस्वं तं विद्याद्ब्रह्मघातकं ॥ यः प्रवृत्तां श्रुतिं सम्यक् शास्त्रं वा
मुनिभिः कृतं दूषयत्यनभिज्ञानात् तं विद्याद्ब्रह्मघातकं ॥ यो दूषयति संमोहाद्घो
स्रुदेवं जगत्पतिं सर्वलोकैककर्तारं तं विद्याद्ब्रह्मघातकं ॥ मातृवत्परिरक्षंतं स
ये क्तिसंहारकारकं पुण्यकरं दूषयेद्यस्तु तं विद्याद्ब्रह्मघातकं ॥ दत्तं धान्यं तत्प्रदेशेनादि
जानां भोक्तुमिच्छतां विघ्नमाचरते यस्तु तं विद्याद्ब्रह्मघातकं ॥ वने वनतरुं माहरा
न्नाराम नोन्नयकारिणः हंतुमिच्छति यो मोहात् तं विद्याद्ब्रह्मघातकं ॥ साक्षिपृष्टश्च
यः पृष्टो जानन्नन्यथा वदेत् लोभाद्द्वेषाद्भयाद्वापि तं विद्याद्ब्रह्मघातकं